श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६

*विराड्देहस्य जगदात्मत्ववर्णनम्*

एवं चतुर्दशजगन्मयतां गतस्य
    पाताळमीश तव पादतलं वदन्ति।
पादोर्ध्वदेशमपि देव रसातलं ते
    गुल्फद्वयं खलु महातलमद्भुतात्मन्॥ १ ॥

जङ्घे तलातलमथो सुतलं च जानू
    किञ्चोरुभागयुगळं वितलातले द्वे।
क्षोणीतलं जघनमम्बरमङ्ग नाभि-
    र्वक्षश्च शक्रनिलयस्तव चक्रपाणे॥ २ ॥

ग्रीवा महस्तव मुखं च जनस्तपस्तु
    फालं शिरस्तव समस्तमयस्य सत्यम्।
एवं जगन्मयतनो जगदाश्रितैर-
    प्यन्यैर्निबद्धवपुषे भगवन् नमस्ते॥ ३ ॥

त्वद्ब्रह्मरन्ध्रपदमीश्वर विश्वकन्द
    छन्दांसि केशव घनास्तव देशपाशाः।
उल्लासि चिल्लियुगळं द्रुहिणस्य गेहं
    पक्ष्माणि रात्रिदिवसौ सविता च नेत्रे॥ ४ ॥

निश्शेषविश्वरचना च कटाक्षमोक्षः
    कर्णौ दिशोऽश्वियुगळं तव नासिके द्वे।
लोभत्रपे च भगवन्नधरोत्तरोष्ठौ
    तारागणाश्च दशनाः शमनश्च दंष्ट्रा॥ ५ ॥

माया विलासहसितं श्वसितं समीरो
    जिह्वा जलं वचनमीश शकुन्तपङ्क्तिः।
सिद्धादयस्स्वरगणा मुखरन्ध्रमग्नि-
    र्देवा भुजाः स्तनयुगं तव धर्मदेवः॥ ६ ॥

पृष्ठं त्वधर्म इह देव मनस्सुधांशु-
    रव्यक्तमेव हृदयांबुजमम्बुजाक्ष।
कुक्षिस्समुद्रनिवहा वसनं तु सन्ध्ये
    शेफः प्रजापतिरसौ वृषणौ च मित्रः॥ ७ ॥

श्रोणिस्थलं मृगगणाः पदयोर्नखास्ते
    हस्त्युष्ट्रसैन्धवमुखा गमनं तु कालः।
विप्रादिवर्णभवनं वदनाब्जबाहु-
    चारूरुयुग्मचरणं करुणांबुधे ते॥ ८ ॥

संसारचक्रमयि चक्रधर क्रियास्ते
    वीर्यं महासुरगणोऽस्थिकुलानि शैलाः।
नाड्यस्सरित्समुदयस्तरवश्च रोम
    जीयादिदं वपुरनिर्वचनीयमीश॥ ९ ॥

ईदृग्जगन्मयवपुस्तव कर्मभाजां
    कर्मावसानसमये स्मरणीयमाहुः।
तस्यान्तरात्मवपुषे विमलात्मने ते
    वातालयाधिप नमोऽस्तु निरुन्धि रोगान्॥ १० ॥

**********